विभागः। ज्ञाननियामकस्वार्थाकारतास्थानीयः प्रतिबिम्बरूप एव सम्बन्धो न तु संयोगमात्रमतिप्रसङ्गादित्यसकृदावेदितम्। विष्णोः सर्वसाक्षित्वं त्विन्द्रियादिव्यवधानाभावमात्रेण गौणम्। अक्षसम्बन्धात् साक्षित्वमिति पाठे त्वक्षमत्र बुद्धिः करणत्वसामान्यात्। तस्मा यथोक्तात् प्रतिबिम्बरूपात् सम्बन्धादित्यर्थः" भा०। तत्रैव अन्यत्र "सुषुप्त्याद्यसाक्षित्वम्" सुषुप्त्याद्यवस्थात्रयस्य बुद्धिनिष्ठस्य साक्षित्वमेव पुंसीत्यर्थः। तदुक्तम् "जाग्रत् स्वप्नः सुषुप्तं च गुणतो बुद्धिवृत्तयः। तासां विलक्षणो जीवः साक्षित्वेन व्यवस्थितः"। इति तासां बुद्धिवृत्तीनां साक्षित्वेन तद्विलक्षणो जाग्रदाद्यवस्थारहितो निर्णीत इत्यर्थः। तत्र जाग्रन्नामावस्थेन्द्रियद्वारा बुद्धेर्विषयाकारः परिणामः। स्वप्नावस्था च संस्कारमात्रजन्यस्तादृशः परिणामः। सुषुप्त्यवस्था च द्विविधाऽर्द्धसमग्रलयभेदेन। तत्रार्द्धलये विषयाकारा वृत्तिर्न भवति। किन्तु स्वगतसुखदुःखमोहाकारैव बुद्धिवृत्तिर्भवति अन्यथोत्थितस्य सुखमहमस्वाप्समित्यादिरूपसुषुप्तिकालीनसुखादिस्मरणानुपपत्तेः। तदुक्तं व्याससूत्रेण "मुग्धेऽर्द्धसम्पत्तिः परिशेषादिति"। समग्रलये तु बुद्धेर्वृत्तिसामान्याभावो मरणादाविव भवति। अन्यथा समाधिसुषुप्तिमोक्षेषु ब्रह्मरूपतेत्यागामिसूत्रानुपपत्तेरिति। सा च समग्रसुषुप्तिर्वृत्त्यभावरूपेति पुरुषस्तत्साक्षी न भवति पुरुषस्य वृत्तिमात्रसाक्षित्वात्। अन्यथा संस्कारादेरपि धर्मस्य साक्षिभास्यतापत्तेः। सुषुप्त्यादिसाक्षित्वं तु तादृशबुद्धिवृत्तीनां प्रकाशनमिति वक्ष्यामः"। [वेदान्तप०।

**साक्षिभास्य** त्रि० ६त०। साक्षिमात्रप्रकाश्ये बुद्धिवृत्त्यादौ

**साक्ष्य** न० साक्षिणो भावः कर्म वा ष्यञ्। १व्यवहारविषयवृत्तवृत्तान्तकथनरूपे साक्षिकर्मणि २तद्भावे च "समक्षदर्शनात् साक्ष्यं श्रवणाच्चैव सिध्यति" मनुः।

**सागर** पु० सगरेण निर्वृत्तः अण्। १समुद्रे अमरः २मृगभेदे पुंस्त्री० शब्दच०। ३संख्याभेदे संख्याशब्दे दृश्यम्।

**सागरगामिनी** स्त्री सागरं गच्छति गम+णिनि न णत्वम्। १नद्यां २स्थूलैलायाञ्च राजनि०।

**सागरनेमि** स्त्री सागरः नेमिरिव वेष्टनाकारो यस्याः। पृथिव्यां हेमच०। [हेमच०।

**सागरमेखला** स्त्री सागरो मेखलेव यस्याः। पृथिव्यां

**सागरालय** पु० सागर आलयो यस्य। वरुणे शब्दच०।

**सागरोत्थ** न० सागरात् उत्तिष्ठति उद्+स्था क। सामुद्रलवणे राजनि०।

**साग्नि(क)** पु० सहाग्निना अग्निहोत्रेण वा कप्। १श्रौतस्मार्त्ताग्नियुक्ते २अग्निहोत्रिणि द्विजे।

**साङ्कर्य्य** न० सङ्करस्य भावः ष्यञ्। १परस्पराभावसामानाधिकरण्ये सत्येकाधिकरणवृत्तित्वरूपे न्यायोक्ते जातिबाधके दोषभेदे सङ्करशब्दे ५१८१ पृ० दृश्यम् २सङ्करस्य धर्मे च। [सि०कौ०।

**साङ्कल** त्रि० सङ्कलेन निर्वृत्तः सङ्कला अण्। सङ्कलनजाते

**साङ्कृति** पु० वैयाघ्रपद्यगोत्रस्य प्रवरे मुनिभेदे "वैयाघ्रपद्यगोत्राय साङ्कृति प्रवराय च" भीष्मतर्पणमन्त्रः।

**साङ्ग** त्रि० सहाङ्गेन। अङ्गयुक्ते "तस्मात् साङ्गमधीत्यैव" "साङ्गं तत् क्रियते पुनः" इति च स्मृतिः।

**साङ्गतिक** त्रि० सङ्गत्या निर्वृत्तः ठक्। सङ्गतिसिद्धे युक्ते।

**साचि** अव्य० सच-इण्। १वक्रे २तिर्य्यगर्थे च अमरः।

**साचिवाटिका** स्त्री साचि यथा तथा वटति वट-ण्वुल्। १श्वेतपुनर्णवायां रत्नमा०।

**साचीकृत** त्रि० असाचि साचि क्रियते साचि-कृ-क्त दीर्घः। वक्रीकृते सि०कौ० "साचीकृता चारुतरेण तस्थौ" कुमा०

**साट** प्रकाशने अद०चु०उ०स०सेट्। साटयति ते असमाटत् त

**साटोप** त्रि० सहाटोपेन सहस्य सः। १सगर्वे २विकटे च।

**सात** सुखे उपादाने अद० चु० उभ० अक० सेट्। सातयति ते अससातत् त। अयं सौत्र इत्येके। [२नष्टे च।

**सात** न० सात-अच्। १सुखे भरतः। सन-क्त। २दत्ते

**सातला** स्त्री सातं सुखं लाति ला-क। १चर्मकषायाम् अमरः। २सेहुण्डभेदे राजनि०।

**सातवाहन** पु० शालिवाहनन्नृपे हेमच०। [अमरः।

**साति** स्त्री सन-क्तिन्। १अवसाने २दाने ३तीव्रपीड़ायाञ्च

**सातीन(ल)क** पु० सतीन(ल)एव स्वार्थे अण्। सतीन(ल) कटके (सुड़मटर) रायमुकुटः।

**सात्यकि** पु० सत्यकस्य वृष्णिवंश्यभेदस्यापत्यम् अण्। शिनेर्नप्तरि स्वनामख्याते वृष्णिवंश्ये क्षत्रियभेदे त्रिका०।

**सात्यवत** पु० सत्यवत्यां मत्स्यगन्धायां भवः अण्। १वेदव्यासे त्रिका०। २सत्यवतः सम्बन्धिनि च। [हला०।

**सात्यवतेय** पु० सत्यवत्या अपत्यम् ढक्। सत्यवतीसुते व्यासे

**सात्वत्** पु० सातयति सुखयति सात-क्विप् सात् परमेश्वरः स उपास्यत्वेनास्त्यस्य मतुप् मस्य वः। विष्णूपासके "भगवान् सात्वतां पतिः" भागवतम्। श्रीधरेण